International Journal of Sanskrit Research 2023; 9(1): 68-69

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 68-69
© 2023 IJSR
www.anantaajournal.com
Received: 05-11-2022
Accepted: 06-12-2022

**डा.बि.बालशिवकुमारः**
प्रकल्पसहायकः,साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः आंध्र प्रदेश, भारत

Corresponding Author:
**डा.बि.बालशिवकुमारः**
प्रकल्पसहायकः,साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः आंध्र प्रदेश, भारत

# वैष्णवागमेषु लिङ्गपूजनम्

## डा.बि.बालशिवकुमारः

प्रस्तावना

लिङ्गपूजनं पूर्णतः शैवधर्मे विहितमिति वयं जानीमः। लिङ्गं नाम चिह्नमित्यर्थः। शिवलिङ्गमित्यत्र शिवस्य चिह्नमित्येवार्थः स्फुटितः। प्रायशः शिवलिङ्गस्योत्पत्तिं पुरुषलिङ्गादेव कल्पयन्ति आधुनिकाः गवेषकाः। किन्तु यजुर्वेदादारभ्य यागाग्नेरेव लिङ्गस्य सम्भवः इति द्रष्टुं शक्यते। यागाग्निः लिङ्गस्वरूपेणैव विभाति। रुद्रो वा एष यदग्निः इति यजुर्वेद् रुद्राग्न्योः ऐक्यं स्मारयति।

पुराणान्यपि लिङ्गानां देवतान्तरसम्बन्धं द्योतयन्ति। वामनपुराणे कुरुक्षेत्रे उमा देवी लिङ्गरूपेण विद्योतते इति निगदितम्।

उमा च लिङ्गरूपेण हरपार्श्वं न मुञ्चति।। वामनपुराणम् 46.7

उमा शिवस्य पार्श्वमजहती सदा लिङ्गरूपेण तिष्ठतीत्यर्थः। तदेव पुराणं सरस्वत्याः अपि लिङ्गस्वरूपं भवतीति कथयति।

तत्रैव लिङ्गरूपेण स्थिता देवी सरस्वती। वामनपुराणम् 46.10

अतः लिङ्गस्वरूपेण पूजनं न केवलं शिवस्य अपि तु अन्या अपि देवताः लिङ्गरूपेण पूजिता इत्यवगन्तुं शक्यते। अतः पुरुषलिङ्गादेव शिवलिङ्गस्योत्पत्तिरिति या प्रथा आधनुनिकैः उपस्थाप्यते सा अपप्रथेति अवगन्तुं शक्यते। एवञ्च वैष्णवागमेष्वपि लिङ्गरूपेण पूजनं दरीदृश्यते।

**सनत्कुमारसंहिता।**

पाञ्चरात्रागमस्य बह्वीषु संहितासु सनत्कुमारसंहितापि अन्यतमा। ब्रह्मरात्रम्, इन्द्ररात्रम्, ऋषिरात्रमिति रात्रत्रयमस्या प्रकाशितम्। इयं संहिता शैवागमानां शैलीं तथा स्वरूपञ्च अनुकरोति। शैवागमानां सदाशिव इव सदाविष्णुरिति परब्रह्मरूपं वर्णितमस्यां संहितायाम्। एवं सप्तमातरोपि वर्णिता भवन्ति। अस्याः ब्रह्मरात्रस्य षष्ठे अध्याये लिङ्गस्य स्थापनं तथा पूजनञ्च वर्णितम्।

लिङ्गस्य स्थापनायां चापि एष एव विधिक्रमः।
लिङ्गं तु त्रिविधं प्रोक्तं ब्राह्मं शाङ्करमेव च।।
वैष्णवं च त्रिदैवञ्च चतुर्थं परिकीर्तितम्।
मूलस्थूलं भवेद्ब्राह्मं शिरस्स्थूलं तु शाङ्करम्।।
वैष्णवं समवृत्तं च धारालिङ्गं तथैव च।
बहुबेरविधाने तु न च निर्माल्यकुल्यका।।

सनत्कुमारसंहिता, ब्राह्मरात्रम्, 6.50-53

लिङ्गानां स्थापनेपि प्रतिमानामिव स्थापनक्रमः अनुसर्तव्यः। लिङ्गानां बहवः प्रकाराः सन्ति। ब्राह्म-शाङ्कर-वैष्णवलिङ्गानि भवन्ति। चतुर्थं त्रैदेविकं भवति। ब्राह्मलिङ्गस्य अग्रभागः स्थूलो भवति। यदि अधोभागः स्थूलः तर्हि तत् शाङ्करलिङ्गम्। यदि सर्वेपि भागाः समाः तर्हि तत् वैष्णवं लिङ्गम्। धारालिङ्गं त्रैदेविकं भवति। यदि एकस्मिन्नेव लिङ्गे बह्व्यः देवताः आवाहितास्तर्हि तत्र गोमुखं न स्थापनीयम्।

एवं सनत्कुमारसंहिता वैष्णवागमान्तर्भूतापि लिङ्गपूजनं वर्णयति। अस्य यद्यपि निदर्शनानि अधिकानि न भवन्ति अथापि इदं अत्यन्तं मुख्यं भवति।

काम्बोजदेशे फूणवंशीयस्य ईशानवर्मणः अधिकारी ईशानदत्तनामा ई प 625 तमे संवत्सरे शिवविष्णुलिङ्गस्य प्रतिष्ठां चकारेति तत्रत्यः शिलालेखः कथयति। पञ्चमजयवर्मणः शासने ई प 972 तमे संवत्सरे विष्णु-महेश्वरलिङ्गं दिवाकरभट्टनाम्ना ब्राह्मणेन स्थापितमित्यपि एकः शिलालेखः प्रमाणयति।

एवं वैष्णवागमे लिङ्गप्रतिष्ठा वर्णिता तदनुकूलतया कानिचन लिङ्गान्यपि उपलभ्यन्ते इत्यपि गवेषकानां नूतनदिग्दर्शको विषयः।

## सन्दर्भ सूची


1. वामनपुराणम्, (सचित्र हिन्दी अनुवादसहित) गीताप्रेस, गोरखपूर्, 2015
2. सनत्कुमारसंहिता, श्रीहरिदासशास्त्री, श्रीगदाधरगौरहरिप्रेस्, मथुरा, 1980
3. पाञ्चरात्रागमः, श्री राघव प्रसाद चौधरी,बिहार राष्ट्रभाषा परिषद्, पट्ना, 1987